International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 332-334
© 2026 IJMH
www.themultijournal.com

Received: 26-03-2026
Accepted: 22-04-2026
Publish : 24-04-2026

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# मीमांसाकुतूहलग्रन्थस्य वैशिष्ट्यम्

**प्रो. प्रभाकरप्रसादः**

उद्देशप्रकरणम्-

**गोकर्णाख्ये शिवक्षेत्रे धूर्जटेर्नित्यसन्निधौ ।**
**स्थितमाराविघ्नेशं सिद्धिदं प्रणमाम्यहम् ।।**
**सारङ्गेशं विश्वनाथं मार्कण्डेयेश्वरं प्रभुम् ।**
**धर्मार्थकाममोक्षाणां हेतून्स्तान्प्रणमाम्यहम् ।।**

श्रीकमलाकरभट्टाचार्यैः ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमादावीश्वरवन्दात्मकं मङ्गलाचरणं कृतम् । तदनु 'यस्य देवे परा भक्तिः यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।।'[1] इति श्रुतेः गुरुवन्दनात्मकमपि मङ्गालाचरणं कृतम् । तदनन्तरं मीमांसाशास्त्रनिहितानां पदार्थानां सारल्येन प्रकाशनमेव ग्रन्थस्यास्य प्रवृत्तेर्बीजमिति ग्रन्थकारैः प्रतिज्ञातम्। न्यायवैशेषिकग्रन्थानामिवास्यापि ग्रन्थस्योद्देशलक्षणपरीक्षाभिस्त्रेधा प्रवृत्तिः ।

आदौ ग्रन्थकारैः 'द्रव्यगुणकर्मशक्तिसामान्यानां पदार्थानां कर्मसमुच्चितं तत्त्वज्ञानं निःश्रेयसहेतुः'[2] इति पदार्थविभागनिर्देशपूर्वकं भाट्टप्रस्थानरीत्या मीमांसादर्शनस्य किं प्रयजोनमिति न्यरूपि । अस्यैव प्रपञ्चः समग्रे ग्रन्थे कृतः। अस्मिन् प्रतिज्ञावाक्ये पञ्च भावपदार्थाः उक्ताः, निःश्रेयसपदवाच्यो मोक्षः प्रयोजनमित्युक्तम्, कर्मसमुच्चितं तत्त्वज्ञानञ्च मोक्षसाधनमित्युक्तम्। एतद्विवेचनार्थमेत एव पञ्चभावपदार्था इति दार्शनिकविविधमतानां चर्चापूर्वकं युक्तिभिः प्रथमं निरुप्यते। तदनु मोक्षस्य साधनविषयेषु स्थितेषु मतभेदेषु ज्ञानकर्मसमुच्चयस्य मोक्षसाधनत्वं भाट्टाभिमतमिति प्रतिपाद्यते । मोक्षस्वरूपं भाट्टाभिमतं किमिति च ततः परं विविच्यते । एतत्प्रसङ्गे वेदैकवेद्य ईश्वरः मीमांसकानामपि सम्मत एवेति सविमर्शः प्रतिपाद्यते।[3] ततः परं प्रतिज्ञावाक्ये समुद्दिष्टानां द्रव्यादीनाम् लक्षणानां विचारः, द्रव्यादीनां भेदाश्च विविच्यन्ते। उपसंहारे च विदितपदार्थतत्त्वानां कथं कीदृशश्च मोक्षः भवतीति विवेचनेन ग्रन्थः परिसमाप्यते।

अत्र मयापि मीमांसाकुतूहलग्रन्थस्य विशिष्टाध्ययने यथामिति उपर्युक्तक्रमेणैव विषयाणां विवेचनं करिष्यते । प्रथमं मीमांसादर्शने भाट्टप्रस्थाने कति पदार्थाः स्वीकृता इति विचार्यते, यतः भाट्टप्रस्थानस्य ग्रन्थेष्वेवापाततः मतभेदा विषयेऽस्मिन् दृश्यन्ते, अतः तेषां विवेचनपूर्वकं कुतूहलग्रन्थोक्ताः पदार्थाः के के इति निरुपणमवसरप्राप्तम् । तत्र मानमेयोदय-ग्रन्थे श्रीनारायणपण्डितैः-

**प्रमेयं बहुधा लोके प्राहुः प्राभाकरादयः ।**
**प्रमाणाभासविश्वासव्याकुलीभूतचेतसः ।।**
**आचार्यमतपीयूषपारावारविहारिणः ।**
**अभावश्चेति पञ्चैतान् पदार्थानाद्रियामहे ।।**[4]

श्रीकुमारिलभट्टाचार्याणां सम्मताः द्रव्यजातिगुणक्रियाः इति चत्वारः भावपदार्थाः, एकोभावपदार्थ इत्याहत्य पञ्च पदार्थाः स्वीकृताः । भाट्टचिन्तामणौ श्रीगागाभट्टैः-

'एवञ्च द्रव्यगुणकर्मसामान्यसमवायशक्त्यभावाः सप्त पदार्थाः'[5] इति षड्भावपदार्थाः, एकोऽभावपदार्थ इत्याहत्य सप्त पदार्थाः स्वीकृताः। पूर्वतन्त्रसिद्धान्तरत्नावल्यां[6] द्रव्यगुणकर्मजात्यभावाः शक्तिश्चेति पञ्चभावपदार्थाः, एकोऽभावपदार्थ इति षट्पदार्थाः स्वीकृताः। प्राभाकरादिप्रस्थानेभ्यो भाट्टप्रस्थानेभ्यो भाट्टप्रस्थानस्य विषयेऽत्र को विशेष इति विवेकार्थं प्राभाकरादिप्रस्थानसम्मताः पदार्थाः कति? ते च क इत्यपि ज्ञेयं भवति । तत्र तन्त्ररहस्ये श्रीजातवेदोयज्वनः शिष्यैः श्रीरामानुजाचार्यैः 'द्रव्यगुणकर्मजाति-समवायसङ्ख्यासादृश्यशक्तय' इति अष्टौ प्रमेयाणीत्युक्तम्। एतच्च श्रीतङ्गस्वामिमहाभागानां मीमांसामञ्जर्याः षष्ठकुमुमस्य[7] प्रामाण्यादुच्यते। गुरुसम्मतपदार्थ-विवेचनपरे ग्रन्थेऽपि पूर्वोक्ता एवाष्टौ पदार्था उक्ताः। तत्रस्थः श्लोकः –

**द्रव्यजातिगुणाः कर्म सङ्ख्यासादृश्यशक्तयः ।**
**समवाय इतीमेऽष्टौ पदार्थाः गुरुसम्मताः ।।**[8]

प्रकरणपञ्चिकाया व्याख्यायां न्यासिद्ध्यां श्रीनारायभट्टैः **'द्रव्यगुणकर्मसामान्यसमवाय- शक्तिसङ्ख्यासादृश्यक्रमाः'**[9] इति नव पदार्थाः प्राभाकरसम्मता इत्युक्तम् । अतः प्राभाकरप्रस्थाने समवायेन सहाष्टौ नव वा पदार्थाः स्वीकृताः, अभावपदार्थस्तु नास्तीति विशेषो वक्तुं शक्यते। वैशेषिकैश्च **'द्रव्यगुणकर्मसामान्यसमवायविशेषाभावाः'** इति सप्तपदार्थाः स्वीकृता इति तु प्रसिद्धमेव। नैयायिकैश्च यदपि षोडशपदार्था उक्तास्तथापि तेषां वैशिषिकाणां सप्तपदार्थेष्वेवान्तर्भा-वस्य मुक्तावल्यादिग्रन्थे कण्ठत उक्तत्वान्न्यावैशेषिकनये सप्तैव पदार्था इति युक्तम्। न्यायसिद्धान्तमुक्तावल्यामुक्तम्-

**द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।**
**समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ।।**[10]

उक्तञ्च तत्रैव 'एते च पदार्थाः वैशेषिके प्रसिद्धाः नैयायिकानामप्यविरुद्धाः, प्रतिपादितश्चैवमेव भाष्ये' इति। न्यायवैशेषिकदर्शनयोरयं विशेषः विशेषाख्यः कश्चन पदार्थविशेषः स्वीक्रियत इति। प्रायः दर्शनान्तरेष्वयं पदार्थो न स्वीकृतः। मीमांसाप्रस्थानेषु प्राभाकरप्रस्थाने समवायाख्यः पदार्थः सर्वैरपि प्राभाकरप्रस्थानानुयायिभिः स्वीकृतः। भाट्टप्रस्थाने बहुभिः ग्रन्थकारैः समवायाख्योयं पदार्थः न स्वीकृतः, तत्स्थाने च तादात्म्यसम्बन्धोऽभिषिक्तः। परन्तु श्रीगागाभट्टचरणैः भाट्टचिन्ता-मणौ 'समवायश्चैकः'[11] इति समवायः स्वीकृतः। अत एव भाट्टचिन्तामणिकारैः इन्द्रियार्थसन्निकर्षस्य वर्णनावसरे 'सन्निकर्षश्च संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायश्चेति' सन्निकर्षत्रयं समवायेन सह स्वीकृतम्। शास्त्रदीपिकायां तर्कपादे व्यक्तिसामान्ययोर्भेदाभेदौ स्त इति निरुपणावसरे समवायः 'येन सम्बन्धेनाधेयमाधारे स्वानुरूपां बुद्धिं जनयति स्वाकारेण बोधयतीत्यर्थः स सम्बन्धः समवाय' इति एतल्लक्षणकः स्वीकृतः।[12] न्यायसुधायाम् आकृत्यधिकरणे सोमेश्वरभट्टचरणैश्च-

**जातिव्यक्त्योः सामानाधिकरण्यबुद्धिहेतुभूतस्य आश्रयी येन भिन्नोपि सम्बन्धेनाश्रये धियम् ।**
**स्वानुरूपां सदा कुर्यात्समवायः स कीर्त्यते ।।**[13]

इति समवायलक्षणमुक्तम्। भाट्टमते 'गुणगुणिनोर्भेदाभेदयोः स्वीकाराद् भेदघटितमिदं लक्षणमपि युज्यत एव। **'गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वाद्'**[14] इति भेदाभेदवादिनां तत्साधनकमनुमानसिद्ध्यादौ प्रसिद्धम्। अतः प्रतिपादितोऽत्र समवायः नैयायिकानां समवायपदार्थापेक्षया भिन्न एव तादात्म्यकुक्षिनिक्षिप्त इति वक्तुं शक्यते। मानमेयोदये श्रीनारायण-पण्डितैः- **'विशेषसमवायौ तु शशविषाणब्रह्मचारिणौ, तत्सिद्धौ प्रमाणाभावाद्'**[15] इति स्पष्टमेवोक्तम्। प्रकृते मीमांसाशास्त्रकुतूहल-ग्रन्थेऽपि बहुभिर्युक्तिभेदैः तार्किकसम्मसतः समवायो निराकृतः, तत्स्थाने च तादात्म्यसम्बन्धः स्वीकृतः। तादात्म्य-समवाययोः को भेद इति चेदुच्यते- भेदसहिष्णुरभेदस्तादात्म्यम्, अयुतसिद्धयोः सम्बन्धः समवायः, ययोर्मध्ये एकमविनश्यतपराश्रितमेवावतिष्ठते तावयुतसिद्धौ ।

**तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः ।**
**अनश्यदेकमपराश्रितमेवावतिष्ठिते ।।**[16] इति उक्तम्।

भाट्टानाम् तादात्म्यं भेदमभेदञ्च सहते, नैयायिकानाम् समवायः कथमप्यभेदं न सहते। यतः नैयायिकैः अवयवावयविनोः, जातिव्यक्त्योः, गुणगुणिनोः, क्रियाक्रियावतोश्च नित्यद्रव्य-विशेषयोश्च यः सम्बन्धः स समवाय इति स्वीक्रियते। नैयायिकाश्च पूर्णतः कार्यमुत्पत्तेः पूर्वमसदतः कारणकलापैर्नूतनं वस्तु उत्पद्यत इति च स्वीकुर्वन्ति, अत आरम्भवादिनो नैयायिकाः। गुणगुणिनोः, अवयवावयविनोः, क्रियाक्रियावतोः परस्परमभेदे गुणस्यावयविनः क्रियायाश्च नूतनत्वासम्भवाद् गुणादयः गुण्यादिभ्यो भिन्ना एवेति न्यायनयज्ञानां मतम् । गुणादयो गुण्यादीनामाश्रिताः यथा घटः गुणी, घटे च नीलादयो गुणाः इति प्रत्यक्षं दृश्यते, घटपटयोरिव परस्परं सम्बन्धाभावे गुणादयो गुण्याद्याश्रिता इति प्रतीतिर्न स्यात्, अतः एतत् प्रतीतिनिर्वाहार्थं कश्चन सम्बन्धोऽपेक्षितः, 'द्रव्ययोरेव संयोगः' इति संयोगस्य द्रव्ययोर्मध्य एव स्वीकारात् तदतिरिक्तः समवायाख्यः सम्बन्धः स्वीक्रियते, तस्य च नित्यत्वान्नित्यसम्बन्धः समवाय इति समवायलक्षणं सङ्गच्छते। तदुक्तम् – 'समवायत्वं नित्यसम्बन्ध-त्वम्'[17] इति। नित्यत्वे सति सम्बन्धत्वं समवायलक्षणमित्यर्थः। अत्र नित्यपदानुपादाने संयोगे स्यादतिव्याप्तिः, नित्यत्वमात्रोक्तौ गगनादौ नित्यपदार्थे-ष्वतिव्याप्तिः। न च नित्यसम्बन्धत्वं स्वरूपसम्बन्धे-ऽतिव्याप्तिरिति वाच्यम्, स्वरूपसम्बन्धस्य प्रतियोग्यनु-योग्यात्म-कत्वात् समवायलक्षणे च सम्बन्धिभिन्नत्वे सतीति विशेषणस्य विवक्षितत्वात्। स्वरूपसम्बन्धश्च क्वचिदनुयोग्यात्मकः क्वचिच्च प्रतियोग्यात्मक इति लाघवात् स्वरूपमेव सम्बन्धः स्वरूपसम्बन्ध इति स्वीक्रियते । तद्यथा घटादयो जन्यपदार्थाः महाकाले सन्तीति घटादिजन्यपदार्थानां महाकालस्य कश्चन सम्बन्धः कालिकसम्बन्धः स्वीक्रियते । तस्य विशिष्टप्रतीतिनियामकत्वेन सम्बन्धत्वं सिद्ध्यति। स च यदि पदार्थान्तरं तर्हि तस्मान्महाकालस्य वैशिष्ट्यस्य नियामकः पदार्थान्तरभूतः सम्बन्धोऽन्यः तस्मादप्यन्यः तस्मादपीत्यन-वस्थापत्तिः। अतः महाकालस्यैकत्वाल्ला-

घवान्महाकालतमक एव स सम्बन्धः स्वीक्रियते। अतोऽत्र स्वरूपसम्बन्धोऽनुयोग्यात्मकः। एवं घटत्वाभावो घटेतरनिष्ठः, पटत्वाभावः पटेतरनिष्ठः द्रव्यत्वाभावश्च गुणादिनिष्ठो लाघवाद् घटत्वाभावादिरूपः स्वीक्रियते। अतोऽत्र स्वरूपसम्बन्धः प्रतियोग्यात्मकः। एवञ्च स्वरूपसम्बन्धस्य प्रतियोग्य-नुयोग्यात्मकत्वात् सम्बन्धिभिन्नत्वं नास्ति। सम्बन्धिभिन्नत्वाभावेऽपि सांसर्गिकविषयतावत्त्वेन सम्बन्धत्वं स्वरूपसम्बन्धस्य युज्यते । अतः सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वे सति नित्यत्वे सति सम्बन्धत्वं समवायलक्षणं फलितम् । मीमांसकानां तादात्म्यसम्बन्धस्तु भिन्नत्वे सत्यभिन्नसत्ताक इति विशेषः। 'भिन्नत्वे सत्यभिन्नसत्ताकत्वम्'[18] सत्तान-वच्छेदकभेदवत्त्वम् तादात्म्यम् इति तादात्म्यसमवाययोर्भेदः। अतः मीमांसाग्रन्थेषु भाट्टप्रस्थानेन सम्बद्धेषु शास्त्रदीपिकाग्रन्थेषु समवायशब्दो दृश्यते स चैतादृशतादात्म्य-सम्बन्धस्यैव वाचक इति स्पष्टम्। यद्यपि नैयायिकैरपि 'तादात्म्यसम्बन्धाव-च्छिन्नप्रतियोगिताकोऽभावोऽन्योन्याभावः'[19] इति अन्योन्याभावस्य स्वीकृतमतरसैरपि तादात्म्यसम्बन्धः स्वीक्रियत इति भाति तथापि तेषां तादात्म्यसम्बन्धः सम्बन्धिभिन्नो नास्ति । घटो न पट इति प्रतीतिस्तु भवति किन्तु घटो न घटः, एतद्घटो नैतद्घट इति वा प्रतीतिर्न भवति, अत एतद्घट एतद्घटस्य तादात्म्यमस्तीति स्वीकार्यम्। तेन च भेदविरुद्धमस्त्यैतत्तादात्म्यम्, अतः न्यायनयज्ञानां सम्मतं तादात्म्यं भेदं न सहते, मीमांसकानां भाट्टानां तादात्म्यं भेदमपि सहतेऽभेदमपीति विशेषः । यद्यपि न्यायनयोक्तस्य भाट्टनयोक्तस्य च तादात्म्यस्य स्वरूपेऽयं भेदो दृश्यते तथापि मतद्वयेऽपि तादात्म्यस्य यथायथं द्रव्यादिष्वेवान्तर्भावः स्वीक्रियते न तु पदार्थान्तरत्वमिति साम्यमपि दृश्यते। अत्र कुतूहलकारैः महता परिश्रमेण तार्किकाणां समवायसम्बन्धो निराकृतः इति पूर्वमेवोक्तम्, निराकरण-प्रकारश्चाग्रे विवेचयिष्यते। अत्रोद्देश्यविवेचनावसरे समवाय-मीमांसकैर्भाट्टै-स्तादात्म्यं स्वीक्रियत इति विवेकार्थं तादात्म्यसमवाययोर्भेदो विचारितः। न्यायवैशेषिकैः शक्तेरतिरि-क्तपदार्थत्वं न स्वीक्रियते, शक्तेः भावरूपत्वं सर्वैरपि मीमांसकैः स्वीक्रियत एव, परन्तु मानमेयोदयादौ क्वचित् शक्तेः गुणपदार्थेऽन्तर्भावः कृतो दृश्यते। प्रकृते मीमांसाशास्त्रकुतूहलकारैः शक्तेः स्वतन्त्रपदार्थत्व-मुक्तम्। भाट्टचिन्तामणावपि श्रीगागाभट्टैः शक्तेः स्वतन्त्रपदार्थत्वमेव स्वीकृतम् । प्राभाकरप्रस्थाने तु शक्तेः भावरूपत्वं बहुभिर्युक्तिभेदैः प्रसाधितम् । तदित्थं प्रकृतेऽत्र ग्रन्थे पञ्च भावपदार्था उद्दिष्टास्तेषां लक्षणादिकमग्रे विवेचयिष्यते। यद्यप्यत्रोपक्रमे पञ्च भावपदार्थाः द्रव्यगुमकर्मशक्तिसामान्याख्या एवोक्ताः तथापि ग्रन्थकारेऽभाव-पदार्थोपि स्वीकृत एव, अभावस्य अधिकरणरूपत्वं वदताम् प्राभाकराणां मतं निराकृतम्। अभावस्य चर्चा शक्तिस्वरूप-वर्णनावसरेऽनुपलब्धिप्रमाणनिरुपणावसरे च कृता दृश्यते। उद्देश-प्रकरणे किमर्थमभावपदार्थस्य पृथङ्गिनरुपणं न कृतमिति प्रश्नस्य समाधानमिदं वक्तुं शक्यते- ग्रन्थकारैः- 'द्रव्यगुणकर्मशक्तिसामान्यानां पदार्थानां कर्मसमुच्चितं तत्त्वज्ञानं'[20] निःश्रेयसहेतुरित्युक्तम्। अनेन पदार्थानां तत्त्वज्ञानं कर्म चेत्युभयोः समुच्चय एव मोक्षहेतुरित्युक्तं भवति। तत्र कर्मणामभावेन सह समुच्चयः कथमपि भवितुं नार्हति, सदसतोरसम्बन्धात् । अतः प्रतिज्ञावाक्ये सप्रयोजनं साधनैः सह पदार्थानां कथनार्थं प्रवृत्तैः श्रीकमलाकरभट्टै समोक्षहेतुभूतकर्मभिः सह समुच्चयार्थं योग्याः पञ्चभावपदार्था एव सङ्कीर्तिता इति न दोषः। 'नामसङ्कीर्तनमुद्देशः'[21] इति वैशेषिकैरुक्तत्वात् तदनुसारेण मीमांसाकुतूहलकाराणामभिमताः पदार्थाः कति ते च क इत्यत्रोद्देशप्रकरणे सामान्यतो विवेचनमकारि ।

**भाट्टोद्दिष्टाः पदार्थाः के मीमांसाशास्त्रसागरे ।**
**कुतूहलाख्यग्रन्थेऽस्मिन्निति सम्यङ्गिनरुपितम् ।।**
**कार्येणानेन भगवान् प्रीयतां श्रीजनार्दनः ।**
**प्रमाणं प्रागनिलयः प्राणभृत् प्राणजीवनः ।।**

## पाद टिप्पणी

1 श्वेताश्वतरोपनिषद्, 22
2 मीमांसाशास्त्रकुतूहलम्, पृ.सं. 1
3 मीमांसाकुतूहलग्रन्थः, पृ.सं. 44
4 मानमेयोदयः, पृ. 142
5 भाट्टचिन्तामणिः, पृ. 17
6 मीमांसामञ्जरी, षष्ठकुसुमे पृ.सं. 146 मध्ये श्रीतङ्गस्वामिभिः प्रदर्शितम्
7 मी.म.पृ. 146
8 अयं ग्रन्थः मानमेयोदयस्य श्रीयोगीन्द्रानन्दस्वामिचरणैः प्रथमे परिशिष्टे दृश्यते। श्रीनारायणपण्डितानामेवायं ग्रन्थ इति बहूनामाशय इति तत्र भूमिकायाम् स्वामिचरणैर्लिखितम् ।
9 प्रकरणपञ्चिका, टीका 3
10 न्या.सि.मु. 2, पृ. 40
11 भाट्टचिन्तामणिः, पृ. 17
12 शा.दी.त.पा., 284
13 न्यायसुधा, 375
14 अद्वैतसिद्धिः, पृ.सं. 43
15 मा.मे, पृ. 270
16 तर्कभाषा
17 न्या.सि.मु., पृ. 86
18 मी.शा.कु., पृ. 11
19 तर्कसंग्रहः, पृ. 112
20 मी.शा.कु., पृ. 1
21 तर्कभाषा, पृ. 2